श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २०

*ऋषभयोगीश्वरचरितवर्णनम्*

प्रियव्रतस्य प्रियपुत्रभूता-
    दाग्नीध्रराजादुदितो हि नाभिः।
त्वां दृष्टवानिष्टदमिष्टिमध्ये
    तवैव तुष्ट्यै कृतयज्ञकर्मा॥ १ ॥

अभिष्टुतस्तत्र मुनीश्वरैस्त्वं
    राज्ञः स्वतुल्यं सुतमर्थ्यमानः।
स्वयं जनिष्येऽहमिति ब्रुवाण-
    स्तिरोदधा बर्हिषि विश्वमूर्ते॥ २ ॥

नाभिप्रियायामथ मेरुदेव्यां
    त्वमंशतोऽभूर्ऋषभाभिधानः।
अलोकसामान्यगुणप्रभाव-
    प्रभाविताशेषजनप्रमोदः॥ ३ ॥

त्वयि त्रिलोकीभृति राज्यभारं
    निधाय नाभिः सह मेरुदेव्या।
तपोवनं प्राप्य भवन्निषेवी
    गतः किलानन्दपदं पदं ते॥ ४ ॥

इन्द्रस्त्वदुत्कर्षकृतादमर्षा-
    द्ववर्ष नास्मिन्नजनाभवर्षे।
यदा तदा त्वं निजयोगशक्त्या
    स्ववर्षमेनद्व्यदधाः सुवर्षम्॥ ५ ॥

www.prapatti.com

जितेन्द्रदत्तां कमनीं जयन्ती-
मथोद्वहन्नात्मरताशयोऽपि।
अजीजनस्तत्र शतं तनूजा-
नेषां क्षितीशो भरतोऽग्रजन्मा॥ ६ ॥

नवाभवन् योगिवरा नवान्ये
त्वपालयन् भारतवर्षखण्डान्।
सैका त्वशीतिस्तव शेषपुत्रा-
स्तपोबलात् भूसुरभूयमीयुः॥ ७ ॥

उक्त्वा सुतेभ्योऽथ मुनीन्द्रमध्ये
विरक्तिभक्त्यन्वितमुक्तिमार्गम्।
स्वयं गतः पारमहंस्यवृत्ति-
मधा जडोन्मत्तपिशाचचर्याम्॥ ८ ॥

परात्मभूतोऽपि परोपदेशं
कुर्वन् भवान् सर्वनिरस्यमानः।
विकारहीनो विचचार कृत्स्नां
महीमहीनात्मरसाभिलीनः॥ ९ ॥

शयुव्रतं गोमृगकाकचर्यां
चिरं चरन्नाप्य परं स्वरूपम्।
दवाहृताङ्गः कुटकाचले त्वं
तापान् ममापाकुरु वातनाथ॥ १० ॥

**********